चतुर्थः पाठः ४

# वीराङ्गना हाडीरानी



चूण्डावतसर्वदारस्य रावतरत्नसिंहस्य विवाहः हाडावती राजकुमार्या सह अभवत्। तस्य विवाहस्य द्वितीये तृतीये वा दिवसे महाराणाराजसिंहस्य सन्देशः आगतः यत् शीघ्रमेव अवरङ्गजेबेन सह युद्धं करणीयम्। इति विज्ञाय रावतरत्नसिंहस्य मनः दोलायमानम् अभवत्। एकतः राज्ञीं प्रति अनुरक्तिः अपरतश्च क्षत्रियधर्मः। अन्ततः क्षत्रियधर्मं पालयन् युद्धाय निश्चयः कृतः। राज्ञी अपि स्वपतिं तिलकं कृत्वा रक्षासूत्रं बद्ध्वा आरार्तिकम् अवतारयत्।

शिरसि उष्णीषं परिधाय शस्त्राणि गृहीत्वा अश्वमारुह्य रावतरत्नसिंहः युद्धाय प्रयाणम् अकरोत्, किन्तु तस्य मनः प्रियायामेव अनुरक्तः आसीत्। रणक्षेत्रं प्रति गच्छन् सः वारं वारं राजप्रासादे अट्टालिकायां स्थितां राज्ञीं पश्यति स्म। राज्ञी अपि निर्निमेषं तम् अवलोकितवती। किङ्कर्तव्यविमूढं नृपं दृष्ट्वा सा अपि मनसि व्याकुला आसीत्।

मोहपाशे आबद्धः सः सेवकम् आहूय प्राह – ''प्रासादं गत्वा महाराज्ञीं कथय यत् भवती किमपि अभिज्ञानचिह्नं ददातु। यं धारयित्वा युद्धे त्वां समीपं मत्वा आनन्देन युद्धं करिष्यामीति'' सेवकः महाराज्ञीं सन्देशं श्रावितवान्।

महाराज्ञी स्वमनसि अचिन्तयत् यत् चुण्डावतस्य मनः मयि अनुरक्तः अस्ति। मोहवशात् सः सम्यक्

युद्धं न करिष्यति तर्हि कथं जेष्यति? यदि अहं जीविता न भविष्यामि तर्हि सः सुखेन युद्धं करिष्यति। वीराङ्गनायाः कृते एषः अनुकूलः अवसरः सौभाग्यश्च। इति विचार्य सा सेवकम् आह "सेवक! स्थालीमानय। अपि च अभिज्ञानचिह्नं नय।" इति उक्त्वा सा खड्गमादाय स्वशिरच्छेदं कृत्वा स्थालीमध्ये अपातयत्। हतप्रभः सेवकः तां स्थालीं वस्त्रावृत्तं कृत्वा रत्नसिंहं प्रति नीतवान्। "गृह्णातु महाराज! इदम् अभिज्ञानचिह्नम्" इति उक्त्वा वाष्पकुलेक्षणः सेवकः रोदितुं प्रारभत्।

वस्त्रम् अपावृत्य तं दृष्टवा आश्चर्यचकितः रत्नसिंहः – "हा! हाडी! त्वया किं कृतम्। मोहग्रस्तं मां सम्यक्तया बोधितवती। अहं मुण्डमाली भूत्वा साक्षात् महाकाल इव शत्रूणां कदनं करिष्यामि। आततायिनः एतादृशं बोधं कारयिष्यामि यत् ते सप्तजन्मनि अपि न विस्मरिष्यन्ति। लप्स्यन्ते ते धूर्तताया: फलम्।"



ततः रावतरत्नसिंहः स्वपत्न्याः मुण्डस्य शिरस्थकचान् भागद्वयं विधाय निजगले धृत्वा युद्धं कृतवान्। अवरङ्गजेबस्य सेना ईदृशं युद्धं कुर्वन्तं रावतरत्नसिंहं दृष्ट्वा साक्षात् महाकालं मत्वा हाहाकारं कुर्वन् पलायनम् अकरोत्।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
| --- | --- | --- |
| प्रेषयति | प्रेषणं करोति | भेजता है |
| परित्रायस्व | रक्षस्व | रक्षा करो |
| परिणीतवान् | विवाहितवान् | विवाह किया |
| आरार्तिकम् | निराजनम् | आरती |
| अभिज्ञानम् | सूचक चिह्नम् | निशानी |
| सर्वदारस्य | प्रमुखस्य | सरदार का |
| वाष्पकुलेक्षणः | साश्रुनेत्रयोः | आँसू से पूर्ण नेत्र वाला |
| कदनम् | मर्दनम् | संहार |
| शिरस्थकचान् | मस्तकस्य केशान् | शिर के बालों को |

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां शब्दानाम् उच्चारणं कुरुत –**

अवरङ्गजेबः ग्रहीतुम् परिणीतवान् युद्धार्थं मुक्तिप्राप्तये
महाराज्ञी गृह्णातु वाष्पकुलेक्षणः विस्मरिष्यन्ति

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि वदत –**

(क) रावतरत्नसिंहः कस्य सन्देशं प्राप्तवान् ?
(ख) राज्ञी कस्य आरार्तिकम् अवतारितवती ?
(ग) रावतरत्नसिंहः शिरसि किं धारयति ?
(घ) कस्मात् कारणात् रावतरत्नसिंहः सम्यक् युद्धं न करिष्यति ?
(ङ) रावतरत्नसिंहः सेवकं किम् आनेतुं प्रेषितवान् ?

### लिखितप्रश्नाः

१. **अधोलिखितानां प्रश्नानां उत्तराणि एकपदेन लिखत –**

(क) रावतरत्नसिंहस्य विवाहः कया सह अभवत् ?
(ख) हाडीरानीं प्रति कः अनुरक्तः आसीत् ?
(ग) सेवकं प्रति रत्नसिंहः किं प्राह ?
(घ) "सेवक! स्थालीमानीय" इति का कथयति ?
(ङ) राज्ञी निर्निमेषं कम् अवलोकितवती ?

२. **अधोलिखितानां प्रश्नानां उत्तराणि एकवाक्येन लिखत-**

(क) रावतरत्नसिंहः कं पालयन् युद्धाय निश्चयः कृतः ?

(ख) रावतरत्नसिंहस्य युद्धार्थं गमनकाले किम् अवतारितवती ?

(ग) राज्ञी मनसि किं चिन्तितवती ?

(घ) मोहपाशे कः आबद्धः आसीत् ?

(ङ) कीदृशः रावतरत्नसिंहः युद्धं कृतवान् ?

३. **मञ्जूषातः उचितं पदं चित्वा रिक्तस्थानानि पूरयत-**

| रत्नसिंहः, निर्निमेषं, राज्ञीं, मोहग्रस्तं, महाकाल इव, स्कन्धे |
|---|

(क) एकतः ........................................ प्रति अनुरक्तिः।

(ख) रावतरत्नसिंहः .................... शस्त्राणि धारयित्वा प्राचलत्।

(ग) राज्ञी अपि ................................. तम् अवलोकितवती।

(घ) ...................................... मां सम्यक्तया बोधितवती।

(ङ) साक्षात् ............................... शत्रूणां कदनं करिष्यामि।

४. **रिक्तस्थानानि पूरयत-**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लभते | .......... | लभन्ते |
| मध्यमपुरुषः | .......... | लभेथे | .......... |
| उत्तमपुरुषः | लभे | .......... | .......... |

५. **निम्नलिखितपदेषु उपसर्गान् पृथक करुत -**

| | | | | |
|---|---|---|---|---|
| **यथा** - प्रेषयति | = | प्र | + | ईषयति |
| (क) आगच्छ | = | ................ | + | .............. |
| (ख) परित्रायस्व | = | ................ | + | .............. |
| (ग) अनुरक्तः | = | ................ | + | .............. |
| (घ) महारावतः | = | ................ | + | .............. |
| (ङ) प्रबलः | = | ................ | + | .............. |
| (च) विस्मरिष्यन्ति | = | ................ | + | .............. |

## योग्यता-विस्तारः

एवमेव विभिन्नानां वीराङ्गनानां यथा पद्मिनी, कर्मवती, करुणावती, दुर्गावती, लक्ष्मीबाई प्रभृतीनाम् चित्रसङ्ग्रहं कृत्वा तेषां विवरणं सङ्गृह्णन्तु।

### सेव्-धातु लट्लकार ( वर्तमान काल )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सेवते | सेवेते | सेवन्ते |
| मध्यमपुरुषः | सेवसे | सेवेथे | सेवध्वे |
| उत्तमपुरुषः | सेवे | सेवावहे | सेवामहे |

### सेव् ( सेवा करना ) धातु लृट् लकार ( भविष्यत् काल )

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सेविष्यते | सेविष्येते | सेविष्यन्ते |
| मध्यमपुरुषः | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| उत्तमपुरुषः | सेविष्ये | सेविष्यावहे | सेविष्यामहे |